नं० ५१३५

नाम – तैत्तिरीयोपनिषद्

कर्ता — x

पत्र संख्या - १५ पत्राणि सं० — x

विषयः – संहिता

तैत्तिरीयप्रातिशाख्योपनिषत् स्वरचिह्निता

५१२५

5135

starting from 7 to 21.
1 to 6 MISSING.
F = 15

॥ इति[redacted]याष्टकेसमाप्तः ॥

तृतीयाष्टक



यस्याः। अतिथिः। मवास्ति। स्वः। यज्ञेन। वनवत्। देवा। मर्तान्। वयं। अग्ने। वनुयाम।
त्वाऽऊताः। वसुऽयवः। हविषा। बुध्यमानाः। वयं। सऽमर्ये। विदथेषु। अह्नां। वयं। राया।
सहसः। पुत्र। मर्तान्॥ ३६॥ यः। नः। आगः। अभि। एनः। भराति। अधि। इत्। अघं। अघ
ऽशंसे। दधात। जहि। चिकित्वः। अभिऽशस्तिं। एतां। अग्ने। यः। नः। मर्चयति। द्वयेन। त्वं।
अस्याः। विऽउषि। देव। पूर्वे। दूतं। कृण्वानाः। अयजंत। हव्यैः। संऽस्थे। यत्। अग्ने। ईय
से। रयीणां। देवः। मर्तैः। वसुऽभिः। इध्यमानः। भव। स्वधि। पितरं। वोधि। विद्वान्। पु
त्रः। यः। ते। सहसः। सूनो इति। ऊहा। कदा। चिकित्वः। अभि। चक्षसे। नः। अग्ने। कदा।

प.र. ॐतः चित्रा यातया सो भूरि ना मा वंदमानः दधाति पिता वसो इति यदि नता नो
१० पयासो कुवित् देवस्य सहसा चकानः सुम्नं अग्निः वनते वरधानः ॥ ३३

सनः चित्रा पात पासे भूरि ना मा सतः चित्रा पातय से भूरि ना मा वंदमानः ॥ श्रीगणेशाय नमः ॥

श्रीमंतात्र जयपति ... ...

१६८०



... २१।२२।२२ ३३३ ... २६

सम

१००

स एकः ॥ स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य । एतं प्राणमयमा-
त्मानमुपसंक्रम्य । एतं मनोमयमात्मानमुपसंक्रम्य । एतं विज्ञानमयमात्मानमुपसंक्रम्य । एत-
मानंदमयमात्मानमुपसंक्रम्य । इमांल्लोकान्कामान्नी कामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते ।
हा३वु हा३वु हा३वु । अहमन्नमहमन्नमहमन्नं । अहमन्नादो३ऽहमन्नादो३ऽहमन्नादः । अहं श्लोक-
कृदहं श्लोककृदहं श्लोककृत् । अहमस्मि प्रथमजा ऋता३स्य । पूर्वं देवेभ्योऽमृतस्य ना३भा-
इ । यो मा ददाति स इदेव मावाः३ । अहमन्नमन्नमदंतमा३द्मि । अहं विश्वं भुवनमभ्यभवा३म् । सु-
वर्णज्योतीः । य एवं वेद । इत्युपनिषत् ॥ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेज-
स्विनावधीतमस्तु मा विद्विषावहै । ॐ शांतिः शांतिः शांतिः ॥ भृगुस्तस्मै यन्नो वि२ शांतिंत
द्विजं ज्ञातस्य । त्रयोदशांतेन द इति से शान्तेनं निघातः प्राणः शरीरमन्नेन परिचक्षीतापो ज्यो-
तिरन्नं बहु कुर्वीत पृथिव्याकाशए कादशौ कादशौ न कंच नैकं षष्ठिरेकान्ना वि२ शांतिरेक-
न्ना वि२ शांतिः ॥ ४ ॥ हरिः ॐ ॥ ॐ अंभस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान् ।
शुक्रेण ज्योतींषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अंतः । यस्मिन्निदं सं च वि चैति सर्वं
यस्मिन्देवा अधि विश्वे निषेदुः । तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन् । येना व्रतं

८ चदिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च। यमंतः समुद्रे कवयो वयंति यदक्षरे परमे
प्रजाः। यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यचसर्ज भूम्यां। यदोषधीभिः पुरुषान्पशूंश्च
विवेश भूतानि चराचराणि। अतः परं नान्यदणीयसं हि परात्परं यन्महतो महांतं। यदेकमव्यक्त
मनंतरूपं विश्वं पुराणं तमसः परस्तात्। ।। तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनां। इष्टा
पूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः। तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चं
कु६ द्रमाः। तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः। सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि। क जं६
ला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः। अर्धमासा मासा ऋतवः संवत्सरश्च कल्पंतां। स आ
पः प्रदुघे उभे इमे अंतरिक्षमथो सुवः। नैनमूर्ध्वं न तिर्यंचं न मध्ये परिजग्रभत्। न तस्येशे क
श्चन तस्य नाम महद्यशः। न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं। हृदा मनीषा
मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवंति। अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ। एष हि देवः
प्रदिशोनु सर्वाः पूर्वो हि जातः स उ गर्भे अंतः। स विजायमानः स जनिष्यमाणः प्रत्यङ्मु
खोत्तिष्ठति विश्वतोमुखः। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पा
त्। संबाहुभ्यां नमति संपतत्रैर्द्यावापृथिवी जनयंदेव एकः। वेनस्तत्पश्यन्विश्वा भु ८
वना

त्रिहितं गुहा २ ९

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ८
वनानि विद्वान्यत्र विश्वं भवत्येकनीडं । यस्मिन्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभुः प्रजा
सु [illegible] प्रतद्वोचे अ
मृतं नु विद्वान् गन्धर्वो नाम [illegible] धामानि वेद भुवनानि विश्वा । यत्र देवा अमृतमानशाना
स्तृतीये धामान्यध्यैरयन्त । परि द्यावापृथिवी यन्ति सद्यः परि लोकान् परि दिशः परि सुवः । ऋतस्य
तन्तुं विततं विचृत्य तदपश्यत्तदभवत्प्रजासु । परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्यात्मनात्मानमभिसंबभूव । सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं
सनिं मेधामयासिषं । उद्दीप्यस्व जातवेदोऽपघ्नन्निरृतिं मम ॥४॥ पशूंश्च मह्यमावह जीव
नं च दिशो दिश । मा नो हिंसीज्जातवेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि श्रिया मा
परिपातय । पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि । तन्नो रुद्रः प्रचोदयात् । तत्पुरु
षाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् । तत्पुरुषाय विद्महे वक्रतुण्डाय धी
महि । तन्नो दन्तिः प्रचोदयात् । तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नः षण्मुखः प्रचो
दयात् । तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् । वेदात्मनाय विद्महे
हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् । नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो
त्रिणिपदानि हि ... [illegible] ... विधाता ॥

१ विष्णुः प्रचोदयात्। वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि तन्नो नारसिंहः प्रचोदयात्। भास्क
राय विद्महे महद्युतिकराय धीमहि तन्नो आदित्यः प्रचोदयात्। वैश्वानराय विद्महे लालीलाय धी
महि तन्नो अग्निः प्रचोदयात्। कात्यायनाय विद्महे कन्यकुमारि धीमहि तन्नो दुर्गिः प्रचोदया
त्। सहस्रपरमा देवी शतमूला शतांकुरा। सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशनी। कांडात्कां
डात्प्ररोहन्ती परुषः परुषः परि ॥७॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च। या शतेन प्रतनोषि स
हस्रेण विरोहसि। तस्यास्ते देवीष्टके विधेम हविषा वयं। अश्वक्रांते रथक्रांते विष्णुक्रांते
वसुंधरा। शिरसा धारयिष्यामि रक्षस्व मां पदे पदे। भूमिर्धेनुर्धरणी लोकधारिणी। उद्धृ
तासि वराहेण कृष्णेन शतबाहुना। मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतं। मृत्तिके ब्रह्मद
त्तासि काश्यपेनाभिमंत्रिता। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं ॥८॥ मृत्तिके प्रतिष्ठिते स
दे वं न मे निर्णुद मृत्तिके। त्वया हतेन पापेन गच्छामि परमां गतिं। यतइंद्र भयामहे ततो नो अभयं कृधि।
मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि। स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी।
वृषेंद्रः पुर एतु नः स्वस्तिदा अभयंकरः। स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। १

स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।अपान्तमन्युस्तृपलप्रभर्मा धुनिः
शिमीवाञ्छरुमाँ२ ऋजीषी। सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः॥१७॥ब्रह्म
जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः। स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिम
सतश्च विवः। स्योना पृथिवि भवानृक्षरा निवेशनी यच्छा नः शर्म सप्रथाः। गन्धद्वारां दुराधर्षां
नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्। श्रीर्मे भजतु। अलक्ष्मीर्मे नश्य
तु। विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन्। महाँ२ इन्द्रो वज्रबाहुः षोडशी
वा० शर्म यच्छतु॥१०॥स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान्द्वेष्टि। सोमानं स्वरणं कृणुहि ब्रह्मणस्प
ते। कक्षीवन्तं य औशिजः। शरीरं यज्ञशमलं कुसीदं तस्मिन्सीदतु योऽस्मान्द्वेष्टि। चरणं पवित्रं वि
ततं पुराणं येन पूतस्तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूता अति पाप्मानमरातिं तरेम। स
जोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान्। जहि शत्रूँ२ रप मृधो नुदस्वाथाभयं कृ
णुहि विश्वतो नः। सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च व
यं द्विष्मः। आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे। यो वः शिवतमो रसः
तस्य भाजयतेह नः। उशतीरिव मातरः। तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।

१० आपोजनयथाचनः। हिरण्यशृंगं वरुणंप्रपद्ये तीर्थं मे देहि याचितः। यन्मयाभुक्तमसाधूनां पापेभ्यश्च
प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं। तन्न इंद्रो वरुणो बृहस्पतिः सविता च पुनंतु पुनः
पुनः। नमोग्नयेप्सुमते नम इंद्राय नमो वरुणाय नमो वारुण्यै नमोद्भ्यः॥१२॥ यदपां क्रूरं यदमेध्यं यद
शांतं तदपगच्छतात्। अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात्। तन्नो वरुणो राजा पाणिना ह्य
वमर्शतु। सोहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकतां।
यश्चाप्सु वरुणः स पुनात्वघमर्षणः। इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या। असि
क्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया। ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत। ततो रात्र्यजा
यत ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो
वशी। सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्षमथो स्वः। यत्पृथिव्यां
10 रजः स्वमांतरिक्षे विरोदसी। इमां स्तदापो वरुणः पुनात्वघमर्षणः। पुनंतु वसवः पुनातु वरुणः
पुनात्वघमर्षणः। एष भूतस्य मध्ये भुवनस्य गोप्ता। एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मय १०
श्रीनु योद्यावापृथिव्योर्हिरण्मयं संश्रितं सुवः॥१४॥ स नः सुवः संशिशाधि। आर्द्रं ज्वलति ज्योतिर
१२ हमस्मि। ज्योतिर्ज्वलति ब्रह्माहमस्मि। योहमस्मि ब्रह्माहमस्मि। अहमस्मि ब्रह्माह

लो २

नस्मि।जहमेवाहंमांसुहोमस्वाहा।अकार्यकार्यवकीर्णीस्तेनोभ्रूणहागुरुतल्पगः।
वरुणोपामघमर्षणस्तस्मात्पापात्प्रमुच्यते।रजोभूमिस्त्वमां२रोदयस्वप्रवदंति
धीराः।आक्रांतसमुद्रःप्रथमेविधर्मंजनयन्प्रजाभुवनस्यराजा।वृषापवित्रेअ
धिसानोअव्येबृहत्सोमोवावृधेसुवानइंदुः॥१५॥परस्ताद्यशोगुहासुममंचक्र
तुंजायधीमहितीक्ष्णदंष्ट्रायधीमहिपरिप्रतिष्ठितंदेभुर्यच्छन्नुदयातनाड्योर्णवःसु
वोराजेकंच॥१६॥रुद्रोरुद्रश्चदंतिश्चनंदिःषण्मुखएवच।गरुडोब्रह्माविष्णुश्चना
रसिंहस्तथैवच।आदित्योग्निश्चदुर्गिश्चक्रमेणद्वादशांपवंस्मिताः॥१७॥जातवेद
सेसुनवामसोममरातीयतोनिदहातिवेदः।सनःपर्षदतिदुर्गाणिविश्वानावेव
सिंधुंदुरितात्यग्निः।तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां।दुर्गां
देवीं२शरणमहंप्रपद्येसुतरसितरसेनमः।अग्नेत्वंपारयानव्योअस्मान्स्वस्ति
भिरतिदुर्गाणिविश्वा।पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनयायशंयोः

१९ विश्वानि नो दुर्गहा जातवेदः सिंधुन्न नावा दुरितातिपर्षि। अग्ने अत्रिवन्मनसा गृणानोस्माकं बोध्य
विता तनूनां। पृतनाजितं सहमानमुग्रमग्निं हुवेम परमात्सधस्थात्। स नः पर्षदति दुर्गाणि
विश्वा क्षामद्देवो अति दुरितात्यग्निः। प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व। गोभिर्जुष्टमयुजो निषिक्तं तवेंद्र वि
ष्णोरनुसंचरेम। नाकस्य पृष्ठमभिसंवसानो वैष्णवीं लोक इह मादयन्तां।१७।२। भूरन्नमग्न
ये पृथिव्यै स्वाहा। भुवोन्नं वायवेन्तरिक्षाय स्वाहा। सुवरन्नमादित्याय दिवे स्वाहा। भूर्भुवः
सुवरन्नं चंद्रमसे दिग्भ्यः स्वाहा। नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरन्नमों॥ ॥ भूर
ग्नये पृथिव्यै स्वाहा। भुवो वायवेन्तरिक्षाय स्वाहा। सुवरादित्याय दिवे स्वाहा। भूर्भुवः सुवः
चंद्रमसे दिग्भ्यः स्वाहा। नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरग्न ॐ॥१४॥ भूरग्नये
च पृथिव्यै च महते च स्वाहा। भुवो वायवे चान्तरिक्षाय च महते च स्वाहा। सुवरादित्याय च
दिवे च महते च स्वाहा। भूर्भुवः सुवः चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा। न
मो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवर्महरोम्॥१५॥ पाहि नो अग्न एनसे स्वाहा। पाहि नो विश्व
वेदसे स्वाहा। यज्ञं पाहि विभावसो स्वाहा। सर्वं पाहि शतक्रतो स्वाहा। पाहि नो अग्न एकया। ११

ए

पांसुनाहृतीयया । पांसुर्दैततीयया । पाहि गार्भिस्यंतस्य भिर्वलोस्याहा ॥७॥ यश्छंदसामृषभ
विश्वरूपश्छंदोभ्यश्छंदांस्याविवेश । सचांशिक्यः पुरोवाचोपनिषदिंद्रो ज्येष्ठ इंद्रियाय
ऋषिभ्यो नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवश्छंद ॐम ॥८॥ नमो ब्रह्मणे धारणं मे अ
स्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं माच्योढ्वं ममामुष्य ॐम ॥९॥ ऋतं तपः सत्यं त
पः श्रुतं तपः शांतं तपो दमस्तपः शमस्तपो दानं तपो यज्ञं तपो भूर्भुवः सुवर्ब्रह्मैतदुपास्वैतत्त
पः ॥१०॥ यथा वृक्षस्य संपुष्पितस्य दूराद्गंधो वात्येवं पुण्यस्य कर्मणो दूराद्गंधो वाति यथासिधा
रां कर्तेवहितामवक्रामे यद्युवे युवे ह वा विह्वयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जु
गुप्सेत् ॥११॥ अणोरणीयान्महतो महीयानात्मा गुहायां निहितोस्य जंतोः । तमक्रतुं पश्यति
वीतशोको धातुः प्रसादान्महिमानमीशं । सप्त प्राणाः प्रभवंति तस्मात्सप्तार्चिषः समिधः
सप्त जिह्वाः । सप्त इमे लोका येषु चरंति प्राणा गुहाशयान्निहिताः सप्त सप्त । अतः समुद्रा गि
रयश्च सर्वेस्मात्स्यंदंते सिंधवः सर्वरूपाः । अतश्च विश्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठ
त्यंतरात्मा । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां । श्येनो गृध्राणां स्व
धितिर्वनानां सोमः पवित्रमत्येति रेभन् । अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयंती

१२ ऽसरूपां। अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥१॥ हंसः शुचिषद्वसुरन्तरिक्ष
सद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋ
तं बृहत्॥ घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम। अनुष्वधमावह मा
दयस्व स्वाहाकृतं वृषभ वक्षि हव्यं॥ समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्व
दयस्व स्वाहाकृतं। घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः। वयं नाम प्रब्रवामा घृतेना
स्मिन्यज्ञे धारयामा नमोभिः। उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत्॥ चत्वारि
शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो
मर्त्यां आविवेश॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन्। इन्द्र एकं
सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः। यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो
महर्षिः। हिरण्यगर्भं पश्यत जायमानं स नो देवः शुभया स्मृत्या संयुनक्तु॥ यस्मात्परं नाप
रमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पू
र्णं पुरुषेण सर्वं॥ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं १२

गुहायां विभ्राजदेतद्यतयो विशंति। वेदांतविज्ञानसुनिश्चितार्थाः सन्यासयोगाद्यतयः शुद्धसत्वाः।
ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे॥२॥ दहं विपापं परमेश्मभूतं यत्पुंडरीकं पुरमध्यसं
संस्थं। तत्रापि दहं गगनं विशोकस्तस्मिन्यदंतस्तदुपासितव्यं। यो वेदादौ स्वरः प्रोक्तो वेदांते च
प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परः स महेश्वरः॥३॥ ॐ अजोन्य आविवेश सर्वं च चारि च॥ सहस्र
शीर्षं देवं विश्वाक्षं विश्वशंभुवं। विश्वं नारायणं देवमक्षरं परमं पदं। विश्वतः परमं नित्यं विश्वं ना
रायणं हरिं। विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति। पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्यु
तं। नारायणं महाज्ञेयं विश्वात्मानं परायणं। नारायणपरो ज्योतिरात्मा नारायणः परः। नारायणपरं ब्रह्मतत्
त्वं नारायणः परः। नारायणपरो ध्याता ध्यानं नारायणः परः। यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि
वा। अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। अनंतमव्ययं कविं समुद्रेंतं विश्वशंभुवं॥४॥ पद्म
कोशप्रतीकाशं हृदयं चाप्यधोमुखं। अधो निष्ट्या वितस्त्यांते नाभ्यामुपरि तिष्ठति। ज्वालमा
लाकुलं भाती विश्वस्यायतनं महत्। संततं शिलाभिस्तु लंबत्याकोशसन्निभं। तस्यांते सु
षिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितं। तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः। सोग्रभु
ग्विभजंतिष्ठन्नाहारमजरः कविः। तिर्यगूर्ध्वमधःशायी रश्मयस्तस्य संतता। संतापयति स्वं देहमापादतलमस्तकः।

१२ देहपादतलमस्तकः। तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः। नीलतोयदमध्यस्थाद्वि
द्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा। तस्याः शिखाया मध्ये परमात्मा
व्यवस्थितः। स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट्। आदित्यो वा एष एतन्मण्डलं तपति तत्र ता
ऋचस्तदृचा मण्डलं स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लो
कोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषस्तानि यजूंषि स यजुषा मण्डलं स यजुषां लोकः सैषा
त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः॥१४॥ आदित्यो वै तेज ओजो बलं यशश्च
क्षुः श्रोत्रमात्मा मनो मन्युर्मनुर्मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं
कं तत्सत्यमन्नममृतो जीवो विश्वः कतमः स्वयंभु ब्रह्मैतदमृत एष पुरुष एष भूताना
मधिपतिर्ब्रह्मणः सायुज्यं सलोकतामाप्नोत्येतासामेव देवतानां सायुज्यं सा नार
ष्टितां समानलोकतामाप्नोति य एवं वेदेत्युपनिषत्॥१५॥ निधनपतये नमः। नि
धनपतान्तिकाय नमः। ऊर्ध्वाय नमः। ऊर्ध्वलिङ्गाय नमः। हिरण्याय नमः। हिरण्यलिं
गाय नमः। सुवर्णाय नमः। सुवर्णलिङ्गाय नमः। दिव्याय नमः। दिव्यलिङ्गाय नमः। १२

भवायनमः। भवलिंगायनमः। शर्वायनमः। शर्वलिंगायनमः। शिवायनमः। शि
वलिंगायनमः। ज्वलायनमः। ज्वललिंगायनमः। आत्मायनमः। आत्मलिंगायनमः।
परमायनमः। परमलिंगायनमः। एतत्सोमस्य सूर्यस्य सर्वलिंगं स्थापयति पा
णिमंत्रं पवित्रं॥१६॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे ना
तिभवे भवस्व मां। भवोद्भवाय नमः। वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय न
मो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बला
य नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥१८॥
अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रु
द्ररूपेभ्यः॥१९॥ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्।
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शि

हिरण्यवर्णाय

वोमेअस्तुसदाशिवोम्॥नमोहिरण्यबाहवेहिरण्यरूपायहिरण्यपतयेऽम्बिकापतयउमाप
तयेपशुपतयेनमोनमः॥२२॥ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं।ऊर्ध्वरेतंविरूपाक्षंविश्वरू
५४ पायवैनमोनमः॥२३॥सर्वोवैरुद्रस्तस्मैरुद्रायनमोअस्तु।पुरुषोवैरुद्रःसन्महोनमोनमः।विश्वं
भूतंभुवनंचित्रंबहुधाजातंजायमानंचयत्।सर्वोह्येषरुद्रस्तस्मैरुद्रायनमोअस्तु॥२४॥
कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे।वोचेमशंतमंहृदे।सर्वोह्येषरुद्रस्तस्मैरुद्रायनमोअ
स्तु॥२५॥यस्यवैकंकत्यग्निहोत्रहवणीभवति।प्रत्येवास्याहुतयस्तिष्ठंत्यथोप्रतिष्ठित्यै॥२६॥
कृणुष्वपाजइतिपंच॥२७॥अदितिर्देवागंधर्वामनुष्याःपितरोसुरास्तेषांसर्वभूतानांमा
तामेदिनीमहतामहीसावित्रीगायत्रीजगत्युर्वीपृथ्वीबहुलाविश्वाभूतानाकतमाकाया
सासत्येत्यमृतेतिवसिष्ठः॥२८॥आपोवाइदंसर्वंविश्वाभूतान्यापःप्राणावाआपःपश
वआपोन्नमापोमृतमापःसम्राडापोविराडापःस्वराडापश्छंदांस्यापोज्योतींष्यापोय
जूंष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवःसुवरापओम्॥२९॥आपःपुनंतुपृथिवीं
पृथिवीपूतापुनातुमां।पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां।यदुच्छिष्टमभोज्यंयद्वा
दुश्चरितंमम।सर्वंपुनंतुमामापोसतांचप्रतिग्रहंस्वाहा॥ओं॥अग्निश्चमामामन्युश्चम ५४

न्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्तां। यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां। पद्भ्या
मुदरेण शिश्ना। अहस्तदवलुंपतु। यत्किंचिद्दुरितं मयि। इदमहं माममृतयोनौ। सत्ये ज्योतिषि जुहो
मि स्वाहा॥३॥ सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्तां। यद्रात्र्या पाप
मकार्षं मनसा वाचा हस्ताभ्यां। पद्भ्यामुदरेण शिश्ना। रात्रिस्तदवलुंपतु। यत्किंचिद्दुरितं मयि।
इदमहं माममृतयोनौ। सूर्ये ज्योतिषि जुहोमि स्वाहा॥४॥ ॐ मित्येकाक्षरं ब्रह्म। अग्निर्देव
ता। ब्रह्म इत्यार्षं। गायत्रं छंदः। परमात्मं स्वरूपं। सायुज्यं विनियोगं॥५॥ आयातु वरदा
देवी अक्षरं ब्रह्मसम्मितं। गायत्री छंदसां मातेदं ब्रह्म जुषस्व मे। यदह्नात्कुरुते पा
पं तदह्नात्प्रतिमुच्यते। यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते। सर्ववर्णे महादेवि सं
ध्याविद्ये सरस्वति। ॐ ओजोसि सहोसि बलमसि भ्राजोसि देवानां धामनामासि विश्वमसि विश्वा
युः सर्वमसि सर्वायुरभिभूरों। गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहया
मि छंदर्षीनावाहयामि श्रीयमावाहयामि गायत्र्या गायत्री छंदो विश्वामित्र ऋषिः सविता

मि

देवताग्निर्मुखं ब्रह्माशिरो विष्णुर्हृदयं रुद्रशिखा पृथिवी योनि प्राणापानव्यानोदानसमानास प्राणा
श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्विंशत्यक्षरा त्रिपदा षट्कुक्षिः पंचशीर्षोपनय
ने विनियोगः। ॐ भूः। ॐ भुवः। ॐ स्वः। ॐ महः। ॐ जनः। ॐ तपः। ॐ सत्यं। ॐ तत्सवितुर्वरे
ण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्
वरोम। उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि। ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासु
खं। स्तुता मया वरदा वेदमाता प्रचोदयन्ती पवने द्विजाता। आयुः पृथिव्यां द्रविणं ब्रह्मवर्च
सं मह्यं दत्त्वा प्रजातुं ब्रह्मलोकं ॥३८॥ घृणिः सूर्य आदित्सोनप्रभा वा यक्षरं। मधुक्षरंति
तद्रसं सत्यं वै तद्रसमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्॥ ब्रह्ममेतु मां। मधु
मेतु मां। ब्रह्ममेव मधुमेतु मां। यास्ते सोम प्रजा वत्सोऽभि सो अहं। दुःष्वप्नहं दुरुष्वहं। या
स्ते सोम प्राणांस्तां जुहोमि। त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्। ब्रह्महत्यां वा ए
ते घ्नंति। ये ब्राह्मणास्त्रिसुपर्णं पठंति। ते सोमं प्राप्नुवंति। आसहस्रात् पंक्तिं पुनंति। ओं

ब्रह्ममेधया। मधुमेधया। ब्रह्ममेव मधुमेधया। अद्या नो देव सवितः प्रजावत्सावीः
सौभगं। परा दुःष्वप्नियं सुव। विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्म आ
सुव। मधु वाता ऋतायते मधु क्षरंति सिंधवः। माध्वीर्नः संत्वोषधीः। मधु नक्तमुतोष
सि मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमांऽअ
स्तु सूर्यः। माध्वीर्गावो भवंतु नः। य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्।
भ्रूणहत्यां वा एते घ्नंति। ये ब्राह्मणास्त्रिसुपर्णं पठंति। ते सोमं प्राप्नुवंति। आसहस्रा
त्पंक्तिं पुनंति॥ ७॥ ब्रह्ममेधवा। मधुमेधवा। ब्रह्ममेव मधुमेधवा। ब्रह्मा देवानां पदवीः
कवीनामृषिर्विप्राणां महिषो मृगाणां। श्येनो गृध्राणां स्वधितिर्वनानां सोमः
पवित्रमत्येति रेभन्। हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। ऋचे त्वा रुचे त्वा
समित्स्रवंति सरितो न धेनाः। अंतर्हृदा मनसा पूयमानाः। घृतस्य धारा अभिचा

कशीति हिरण्ययो वेतसो मध्य आसां। तस्मिं सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः।
तस्यासते हरयः सप्त तीरे स्वधां दुहाना अमृतस्य धारां। य इदं त्रिसुपर्णमयाचितं ब्राह्मणा
य दद्यात्। वीरहत्यां वा एते घ्नंति। ये ब्राह्मणास्त्रिसुपर्णं पठंति। ते सोमं प्राप्नुवंति। आसहस्रा
त्पंक्तिं पुनंति॥४०॥ ॐ मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना। त्वया जु
ष्टा नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीराः। त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मागत
श्रीरुत त्वया। त्वया जुष्टश्चित्रं विंदते वसु सा नो जुषस्व द्रविणो न मेधे। मेधां म इंद्रो द
दातु मेधां देवी सरस्वती। मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा। अप्सरासु च यो
मेधां गंधर्वेषु च यन्मनः। दैवी मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहा॥४२॥ आ मां
मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या। ऊर्जस्वती पयसा पिन्वमाना सा मां मे
धा सुप्रतीका जुषंतां। मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयी
द्र इंद्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥४४॥ अपैतु मृत्युरमृतं न
आगन्वैवस्वतो नो अभयं कृणोतु। पर्णं वनस्पतेरिवाभि नः शीयतां रयिः सचतां

नः शचीपतिः। परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवी
मि मा नः प्रजां रीरिषो मोत वीरान्॥ वातं प्राणं मनसान्वारभामहे प्रजापतिं यो भुवनस्य गो
पाः। स नो मृत्योस्त्रायतां पात्वंहसो ज्योग्जीवा जरामशीमहि॥ अमुत्र भूयादध यद्यम
स्य बृहस्पतेरभिशस्तेरमुंचः। प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शची
भिः॥१८॥ हरिं हरंतमनुयंति देवा विश्वस्येशानं वृषभं मतीनां। ब्रह्म सरूपमनु मेदमागाद
यनं मा विवधीर्विक्रमस्व॥१९॥ शल्यैरग्निमिंधान उभौ लोकौ सनेमहं। उभयोर्लोकयो
र्ऋध्वातिमृत्युं तराम्यहं। मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः। प्रजां मा मे
रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम॥ मा नो महांतमुत मा नो अर्भकं मा न उक्षंत
मुत मा न उक्षितं। मा नो वधीः पितरं मोत मातरं प्रियामा नस्तनुवो रुद्र रीरिषः॥ मानस्तो
के तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधी
र्हविष्मंतो नमसा विधेम ते। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां॥२०॥ स्वस्तिदा विशस्प

आत्मकृतस्यैनसो० ५

९७ तिर्य्यङ् नुहाविमृधो वशी । स्वेङ्गः पुर एतु नः स्वस्तिदा अभयंकरः ॥५५॥ त्र्यंबकं यजामहे सु
गंधिं पुष्टिवर्द्धनं । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥५६॥ ये ते सहस्रमयु
तं पाशा मृत्यो मर्त्याय हंतवे । तान् यज्ञस्य मायया सर्वानवयजामहे ॥५७॥ मृत्यवे स्वाहा मृ
त्यवे स्वाहा ॥५८॥ देवकृतस्यैनसोऽवयजनमसि स्वाहा । मनुष्यकृतस्यैनसो० पितृकृत
स्यैनसो० अन्यकृतस्यैनसो० अस्मत्कृतस्यैनसो० यद्दिवा च नक्तं चैनश्चकृम तस्यावय तं ५
जनमसि स्वाहा । यत्स्वपंतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा । यत्सुषुप्त नं ६
श्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा । यद्विद्वांसश्चाविद्वांसश्चैनश्च
कृम तस्यावयजनमसि स्वाहा । एनस एनसोऽवयजनमसि स्वाहा ॥६०॥ यद्वो देवाश्चकृ
म जिह्वया गुरु मनसो वा प्रयुती देवहेडनं । अरावा यो नो अभिदुच्छुनायते तस्मिंस्तदेनो
वसवो निधेतन स्वाहा ॥६१॥ कामोऽकार्षीन्नमो नमः । कामोऽकार्षीत् कामः करोति नाहं
करोमि कामः कर्ता नाहं कर्ता कामः कारयिता नाहं कारयिता एष ते काम कामाय स्वाहा ॥६२॥
मन्युरकार्षीन्नमो नमः । मन्युरकार्षीन्मन्युः करोति नाहं करोमि मन्युः कर्ता नाहं कर्ता म

17

दुःकारयिता नाहं कारयिता तस्य नेमन्यो मन्ये वै स्वाहा॥९३॥ एते तिला तु होमि... रसाः सर्वविघ्ना
न गच्छंतु मम चित्ते रमैवं तु स्वाहा। गावो हिरण्यं धनमन्नपानं सर्वेषां श्रियै स्वाहा। श्रियं
च लक्ष्मीं च पुष्टिं च कीर्त्तिं चानृण्यतां ब्रह्मण्यं बहुपुत्रतां। श्रद्धामेधे प्रजाः संददातु स्वाहा॥९४॥
तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः। तिलाः पुनंतु मे पापं यत्किंचिद्दुरितं मयि
स्वाहा। चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः। गोस्तेयं सुरापानं भ्रूणहत्या तिला शांतिं
शमयंतु स्वाहा। श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्त्तिं चानृण्यतां श्रद्धामेधे प्रज्ञां तु जातवेदः संद
दातु स्वाहा॥९५॥ प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूया
सं स्वाहा। वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिः संकल्पा मे शुध्यंतां ज्योतिर
हं विरजा विपाप्मा भूयासं स्वाहा। त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यं
तां ज्योति०। शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघशिश्नोपस्थपायवो मे शुध्यंतां ज्योतिर०। उत्ति
ष्ठ पुरुष हरितपिंगल लोहिताक्षि देहि देहि ददापयिता मे शुध्यंतां ज्योतिरहं०। शब्दस्पर्शरूप
रसगंधा मे शुध्यंतां ज्योति०। मनोवाक्कायकर्माणि मे शुध्यंतां ज्योति०। अव्यक्तभावैरहं
[illegible] पुरुषात्मा मे शुध्यंतां ज्योतिरहं वि० २

धैर

१८ कारै ज्योतिर० आत्मा मे शुध्यंतां ज्यो० अंतरात्मा मे शुध्यंतां ज्योतिर० परमात्मा मे शुध्यंतां ज्योतिः
क्षुधे स्वाहा। क्षुत्पिपासाय स्वाहा। विविट्यै स्वाहा। ऋग्विधानाय स्वाहा। कषोत्काय० क्षुत्पि
पासामलं ज्येष्ठामलक्ष्मीं नाशयाम्यहं। अभूतिमसमृद्धिं च सर्वां निर्णुद मे पाप्मानं स्वाहा।
अन्नमयप्राणमयमनोमयविज्ञानमयमानंदमयमात्मा मे शुध्यंतां ज्योति० अग्नये स्वा
हा। विश्वेभ्यो देवेभ्यः स्वाहा। ध्रुवाय भूमाय० ध्रुवक्षितये स्वाहा। अच्युतक्षितये० अ
ग्नये स्विष्टकृते० धर्माय स्वाहा। अधर्माय० अद्भ्यः० ओषधिवनस्पतिभ्यः० रक्षोदेवज
नेभ्यः० गृह्याभ्यः० अवसानेभ्यः० अवसानपतिभ्यः० सर्वभूतेभ्यः० कामाय० अंतरि
क्षाय० यदेजति जगति यच्च चेष्टति नाम्नो भागो यन्नाम्ने स्वाहा। पृथिव्यै० अंतरिक्षाय०
दिवे० सूर्याय० चंद्रमसे० नक्षत्रेभ्यः० इंद्राय स्वाहा० बृहस्पतये० प्रजापतये० ब्रह्मणे० स्वधापि
तृभ्यः० नमो रुद्राय पशुपतये० देवेभ्यः० पितृभ्यः स्वधा नमः। भूतेभ्यो नमः। मनुष्येभ्यो हंता।
प्रजापतये स्वाहा। परमेष्ठिने० यथा कूपशतधारः सहस्रधारो अक्षितः। एवा मे अस्तु धा
न्यं सहस्रधारमक्षितं। धनधान्यै स्वाहा। ये भूता प्रचरंति दिवानक्तं बलिमिच्छंतो १८

विद्धुरस्य प्रेष्ठाः। तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा॥४॥ ॐ ओष
धिवनस्पतिभ्यः स्वाहा। नारिक्षाय स्वाहा। नमो रुद्राय पशुपतये स्वाहा। विद्धुरस्य प्रेष्ठाय० कै०॥ ॐ
ॐ नद्भुल। ॐ नह्मायुः। ॐ नदग्ना। ॐ नमस्वं। ॐ नमस्वैं। ॐ नमस्तेनमः। अन्तश्चरति भूतेषु
गुहायां विश्वमूर्त्तिषु। त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्वं रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः
त्वेनदापं आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः सुवरोँ॥६०॥ श्रद्धायां प्राणे निविश्यामृतं जुहो
मि। श्रद्धायामपाने निविश्यामृतं० श्रद्धायां व्याने निविष्टो० श्रद्धायामुदाने निविष्टो० श्रद्धा
याँ समाने निविश्यामृतं जुहोमि। ब्रह्मणि म आत्मामृतत्वाय। अमृतोपस्तरणमसि। श्र
द्धायां प्राणे निविश्यामृतं जुहोमि। शिवो मा विशाप्रदाहाय। प्राणाय स्वाहा। श्रद्धायामपाने नि०
शिवो० अपाना० श्रद्धायां व्याने नि० शिवो० व्यानाय० श्रद्धायामुदाने नि० शिवो० उदानाय०
श्रद्धायां समाने नि० शिवो० समानाय० ब्रह्मणि म आत्मामृतत्वाय। अमृतापिधानमसि॥६१॥
श्रद्धायां प्राणे निविश्याप्यमृतं हुतं। प्राणमन्नेनाप्यायस्व। श्रद्धायामपाने निवि० अपानमन्ने०
श्रद्धायां व्याने निवि० व्यानमन्नेना० श्रद्धायामुदाने नि० उदानमन्ने० श्रद्धायां समाने नि०

७०
1 समुन्नमन्तो॰ अंगुष्ठमात्रः पुरुषोंगुष्ठं च समाश्रितः। ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभु
क्। वाङ्म आसन्। नसोः प्राणः। अक्ष्योश्चक्षुः। कर्णयोः श्रोत्रं। बाहुवोर्बलं। ऊरुवोरोजः। अरिष्टा
विश्वान्यंगानि तनूः। तनुवा मे सह नमस्ते अस्तु मा मा हिंसीः। ७२। वयः सुपर्णा उपसेदुरिंद्रं
प्रियमेधा ऋषयो नाधमानाः। अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान्। ७३।
प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः। तेनान्नेनाप्यायस्व। ७४। नमो रुद्राय विष्णवे मृत्युर्मे
पाहि। ७५। त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि। त्वं वनेभ्यस्त्वमो
षधीभ्यस्त्वं नृणां नृपते जायसे शुचिः। ७६। शिवेन मे संतिष्ठस्व स्योनेन मे संतिष्ठस्व सुभू
तेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व यज्ञस्यर्द्धिमनु संतिष्ठस्वोप ते यज्ञ नम उप ते नम
उप ते नमः। ७७। सतं परं परं सत्यं सत्येन न सुवर्गाल्लोकाच्च्यवंते कदाचन सतां हि सत्यं
तस्मात्सत्ये रमंते तप इति तपो नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षं तदुराधर्षं तस्मात्तपसि रमं
ते दम इति नियतं ब्रह्मचारिणस्तस्माद्दमे रमंते शम इत्यरण्ये मुनयस्तस्माच्छमे रमंते दानमिति
सर्वाणि भूतानि प्रशंसंति दानान्नातिदुष्करं तस्माद्दाने रमंते धर्म इति धर्मेण सर्वमिदं प १७

रिगृहीतं च धर्मान्नातिदुष्करं तस्माद्धर्मे रमन्ते प्रजननमिति भूयाꣳसस्तस्माद्भूयिष्ठाः प्रजायन्ते तस्मा
द्भूयिष्ठाः प्रजनने रमन्तेऽग्नय इत्याह तस्मादग्नय आधातव्या अग्निहोत्रमित्याह तस्मादग्निहोत्रे र
मन्ते यज्ञ इति यज्ञो हि देवास्तस्माद्यज्ञे रमन्ते मानसमिति विद्वाꣳसस्तस्माद्विद्वाꣳस एव मानसे रमं
ते न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि तपाꣳसि न्यास एवात्यरेचयद्य
एवं वेदेत्युपनिषत् ॥७८॥ प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवन्तः पर
मं वदंतीति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं
प्रतिष्ठितं तस्मात्सत्यं परमं वदंति तपसा देवा देवतामग्र आयन्तपसर्षयः सुवरन्वविंदंस्तपसा
सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदंति दमेन दांताः किल्बिषम
वधून्वंति दमेन ब्रह्मचारिणः सुवरगच्छन्दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्माद्दमः
परमं वदंति शमेन शांताः शिवमाचरंति शमेन नाकं मुनयोऽन्वविंदंश्शमो भूतानां दुराधर्षं
शमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदंति दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्व
भूतान्युपजीवंति दानेनारातीरपानुदंत दानेन द्विषंतो मित्रा भवंति दाने सर्वं प्रतिष्ठितं

२० तस्माद्धर्मं परमं वदंति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पंति धर्मेण
पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदंति प्रजननं वै प्रतिष्ठा लोके साधु प्रजया
स्तंतुं तन्वानः पितॄणामनृणो भवति तदेव तस्यानृणं तस्मात्प्रजननं परमं वदंत्यग्नयो वै
त्रयी विद्या देवयानः पंथा गार्हपत्य ऋक्पृथिवी रथंतरमन्वाहार्यपचनं यजुरंतरिक्षं वा
मदेव्यमाहवनीयः साम सुवर्गो लोको बृहत्तस्मादग्नीन्परमं वदंत्यग्निहोत्रं सायं प्रात
र्गृहाणां निष्कृतिः स्विष्टं सुहुतं यज्ञक्रतूनां प्रायणं सुवर्गस्य लोकस्य ज्योतिस्तस्मा
दग्निहोत्रं परमं वदंति यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदंत यज्ञेन द्वि
षंतो मित्रा भवंति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदंति मानसं वै प्राजापत्यं पवि
त्रं मानसेन मनसा साधु पश्यति मानसा ऋषयः प्रजा असृजंत मानसे सर्वं प्रति
ष्ठितं तस्मान्मानसं परमं वदंति न्यास इत्याहुर्मनीषिणो ब्रह्माणं ब्रह्मा विश्वः कतमः
स्वयंभूः प्रजापतिः संवत्सर इति संवत्सरोऽसावादित्यो य एष आदित्ये पुरुषः स परमेष्ठी २०

ब स्मात्ना या. मिरादिस स्तपतिरग्निमिस्ताभिपर्जन्योवर्षति पर्जन्येनौषधिवनस्
नौषधिवनस्प
तयः प्रजायन्तओषधिवनस्पतिभिरन्नंअन्नेन प्राणाः प्राणैर्बलंबलेन तपस्तपसा
श्रद्धाश्रद्धयामेधामेधयामनीषामनीषयामनोमनसाशांतिःशांत्याचित्तंचित्तेनस्मृ
तिंस्मृत्यास्मारंस्मारेणविज्ञानंविज्ञानेनात्मानंवेदयतितस्मादन्नंददत्सर्वाण्ये
तानिददात्यन्नात्प्राणाभवंतिभूतानांप्राणैर्मनोमनसश्चविज्ञानंविज्ञानादानंदोब्र
ह्मयोनिःसवाएषपुरुषःपंचधापंचात्मायेनसर्वमिदंप्रोतंपृथिवीचांतरिक्षंचद्यौ
श्चदिशश्चावांतरदिशाश्चसवैसर्वमिदंजगत्ससभूतंसभव्यंजिज्ञासकॢप्तऋ
तजारयिष्ठाःश्रद्धासत्योमहस्वांतपसोवरिष्ठाज्ञात्वातमेवंमनसाहृदाचभूयोन
मृत्युमुपयाहिविद्वांतस्मान्न्यासमेषांतपसामतिरिक्तमाहुर्वसुरण्वोविभूरसिप्रा
णेत्वमसिसंधाताब्रह्मन्त्वमसिविश्वधृत्तेजोदास्त्वमस्यग्निरसिवर्चोदास्त्वमसिसू
र्यस्यद्युम्नोदास्त्वमसिचंद्रमसउपयामगृहीतोऽसिब्रह्मणेत्वामहसओमित्यात्मा

पा ब्रह्म:—

नं प्रज्ञानेन तद्वै महोपनिषदं देवानां गुह्यं य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो
महिमानमित्युपनिषत् ॥७०॥ तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमि
ध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्द
मः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीध्याव
21 द्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्सं
चरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य
विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यंदिनं सायं च तानि सव
नानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्द्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋत
वस्ते पशुबंधा ये संवत्सराश्च तेऽहर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ ए
तद्वै जरामर्यमग्निहोत्रं सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं ग
त्वादित्यस्य सायुज्यं सलोकतामाप्नोत्येतौ वै सूर्याचंद्रमसोर्महिमानौ ब्राह्मणो विद्वा
× गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चंद्रमसः सायुज्य

॥तैत्तरीयस्योउपनिषद समाप्ता॥

स्कन्दुन प्रतो०

२३४